# षष्ठः पाठः

# छन्दांसि

छन्दसो गणना षट्सु वेदाङ्गेषु भवति। 'छन्दः पादौ तु वेदस्य' इति प्रपादयद्भिराचार्यैः छन्दःशास्त्रस्य वेदज्ञानाय अनिवार्यता निर्दिष्टा। यथा लोके पादावन्तरा पुरुषस्य गतिर्नास्ति तथैव वेदे छन्दोज्ञानविरहितस्य पङ्गोर्गत्यभावः सुनिश्चित एव। न केवलं वेदज्ञानाय एव छन्दःपरिज्ञानमनिवार्यमपितु लौकिककाव्यशास्त्रेषु पाटवं रचनानैपुण्यं चाधिगन्तुमपि छन्दोबोधः परमावश्यको विद्यते !

वैदिकवाङ्मये लौकिकवाङ्मये च छन्दःशास्त्रस्य विशिष्टं स्थानं विद्यते। छन्दःशास्त्रस्य प्राचीनं नाम छन्दोविचितिरप्यस्ति। शास्त्रभेदेन चास्य छन्दोऽनुशासनं, छन्दोविवृतिः, छन्दोमानं चेत्यादीनि नामान्यपि प्राप्यन्ते। छन्दो द्विविधमुच्यते– (अ) वैदिकच्छन्दः (आ) लौकिकच्छन्दश्चेति। तत्र –

## (अ) वैदिकच्छन्दांसि –

प्रमुखानि वैदिकच्छन्दांसि निम्नलिखितानि सन्ति –

1. गायत्री 2. उष्णिक् 3. अनुष्टुप् 4. बृहती 5. पंक्तिः 6. त्रिष्टुप् 7. जगती। इमानि छन्दांसि 'सप्तच्छन्दांसि' इति नाम्ना निर्दिश्यन्ते। एतेषां छन्दसाम् अक्षरसंख्या (क्रमशः) चतुश्शो वर्धते। वैदिकच्छन्दसां प्रयोगो वेदेषु प्राप्यते।

## (आ) लौकिकच्छन्दांसि –

काव्यशास्त्रादिषु प्रयुक्तानि छन्दांसि लौकिकच्छन्दांसि इत्युच्यन्ते। यद्यपि छन्दःशास्त्रे वार्णिकेण मात्रिकेन च भेदेन अनेकेषां छन्दसां वर्णनं प्राप्यते, परं तेषां सर्वेषां प्रयोगः साहित्ये नावलोक्यते। वाल्मीकिरामायणे त्रयोदशानां छन्दसां, महाभारतेऽष्टादशानां छन्दसां, श्रीमद्भागवतपुराणे च पञ्चविंशतेः छन्दसां प्रयोगः अभवत्। परवर्तिकाव्येषु संख्येयं पञ्चाशत्–परिमिता अभवत्। महाकविना माघेन स्वकीये शिशुपालवधमहाकाव्ये विविधच्छन्दसां रुचिरः समावेशः कृतः।

### छन्दःशास्त्रस्य परम्परा –

आचार्ययादवप्रकाशेन पिङ्गलसूत्रस्यावसाने छन्दःशास्त्र–परम्परा–परिचायकमेकं पद्यमुदाहृतम् –

**छन्दोज्ञानमिदं भवाद् भगवतो लेभे गुरूणां गुरुः,**
**तस्माद् दुश्च्यवनस्ततोऽसुरगुरुर्माण्डव्यनामा ततः।**
**माण्डव्यादपि सैतवस्तत ऋषिर्यास्कस्ततः पिङ्गलः,**
**तस्येदं यशसा गुरोर्भुवि धृतं प्राप्यास्मदाद्यैः क्रमात्।।**

1. **प्रथमः क्रमः –** युधिष्ठिरमीमांसक–कृत–वैदिकच्छन्दोमीमांसानुसारं प्रथमः क्रमः – बृहस्पतिः –दुश्च्यवनः – शुक्राचार्यः –माण्डव्यः – सैतवः – यास्कः – पिङ्गलश्चेत्येवं विद्यते।
2. **द्वितीयः क्रमः –** शिवः –गुहः – सनत्कुमारः – बृहस्पतिः – इन्द्रः –शेषनागः (पतञ्जलिः) –

पिङ्गलश्चेत्येवं वर्तते।

3. **तृतीयः क्रमः –** पिङ्गलच्छन्दःसूत्रस्य हलायुधवृत्तौ पिङ्गलात् पूर्ववर्तिनां केषाञ्चन आचार्याणामुल्लेखो विद्यते। तद्यथा–न्यङ्कु–कौ (क्रौ) ष्टुक् – यास्कशाकटायनादिभिः महर्षिभिः विरचितानि छन्दःशास्त्राणि अत्यन्तकठिनानि ज्ञात्वा संसारोपकारेच्छया पिङ्गलाचार्येण छन्दःशास्त्रं रचितम्।

## छन्दःशास्त्रस्य आचार्यपरम्परा –

छन्दःशास्त्रस्य आचार्यपरम्परायां प्रमुखा आचार्या निम्नलिखिताः सन्ति –

1. **आचार्य–पिङ्गलः** – पिङ्गलस्य 'छन्दःसूत्रम्' समुपलब्धेषु छन्दोग्रन्थेषु प्राचीनतमो ग्रन्थो विद्यते। देशः कालश्च अस्याचार्यस्य सप्रमाणं न ज्ञायते। पिङ्गलकृतस्य छन्दःशास्त्रस्य अनेकेषु व्याख्याकारेषु हलायुधः सुप्रसिद्धो विद्यते।
2. **जयदेवः** – आचार्यस्यास्य रचना 'जयदेवच्छन्दः' इति वर्तते। अस्याधारः पिङ्गलकृतं छन्दःशास्त्रमेव विद्यते।
3. **जयकीर्तिः** – कन्नडदेशीयः अयं जैनसम्प्रदायाचार्यः अष्टाधिकारविभक्तं 'छन्दोऽनुशासनम्' अरचयत्। अस्मिन् ग्रन्थे संस्कृतच्छन्दोभिः सहैव कन्नडच्छन्दसां विवरणम् अपि उपलभ्यते।
4. **केदारभट्टः** – केदारभट्टस्य छन्दोविषयको ग्रन्थो 'वृत्तरत्नाकरः' विद्यते। वृत्तरत्नाकरे षट्सु अध्यायेषु 136 श्लोकाः सन्ति। अत्र लक्षणे छन्दसः उदाहरणमपि समुपलभ्यते। वृत्तरत्नाकरः छन्दःशास्त्रस्य लोकप्रियो ग्रन्थो विद्यते।
5. **क्षेमेन्द्रः** – क्षेमेन्द्रस्य 'सुवृत्ततिलकम्' इत्याख्ये ग्रन्थे छन्दसां लक्षणोदाहरणैः सहैव तत्प्रयोगविषयेऽपि उपयोगिज्ञानं लभ्यते।
6. **कालिदासः** – कालिदासस्य 'श्रुतबोधः' लौकिकच्छन्दसां ज्ञानाय सर्वाधिकोपयोगी ग्रन्थो मन्यते। श्रुतबोधे 44 श्लोकेषु 37 छन्दसां वर्णनं प्राप्यते।
7. **हेमचन्द्रः** – हेमचन्द्रस्य 'छन्दोऽनुशासनम्' छन्दःशास्त्रस्य सुप्रसिद्धो ग्रन्थो विद्यते। अत्र प्राकृतानां तथैव च अपभ्रंशच्छन्दसामपि ज्ञानं समुपलभ्यते।
8. **गंगादासः** – गंगादासस्य 'छन्दोमञ्जरी' अपि छन्दःशास्त्रस्य लोकप्रियो ग्रन्थो विद्यते। अत्रापि वृत्तरत्नाकरवत् लक्षणान्येवोदाहरणरूपतां प्राप्नुवन्ति।

## छन्दो–विभागः

महर्षिपिङ्गलादयः अन्ये च आचार्याः लौकिकच्छन्दसां विभागद्वयं प्रतिपादयन्ति। तद्यथा–

**(1) मात्रिकच्छन्दः (2) वार्णिकच्छन्दश्चेति**। तत्र –

**(1) मात्रिकच्छन्दः** – यस्मिन् छन्दसि मात्राणां गणना क्रियतेऽर्थात् मात्रासंख्याम् आधृत्य रचना क्रियते तत् छन्दो मात्रिकच्छन्द इत्युच्यते। यथा –आर्या –उपगीतिरित्यादीनि।

**(2) वार्णिकच्छन्दः** – यस्मिन् छन्दसि वर्णानां नियतसंख्याऽऽधारेण रचना क्रियते तत् वार्णिकच्छन्द इत्युच्यते यथा – अनुष्टुप् – इन्द्रवज्रादीनि।

पदानां समानताऽऽधारेणापि वृत्तानां त्रयो भेदा भवन्ति। तद् यथा–

(1) **समवृत्तम्** – यस्य चत्वारः पादाः समानाः भवन्ति तत् समवृत्तं भवति।

(2) **अर्धसमवृत्तम्** – यस्य प्रथमपादः तृतीयपादतुल्यस्तथा द्वितीयः पादः चतुर्थपादतुल्यो भवति, तदर्धसमवृत्तं भवति।

(3) **विषमवृत्तम्**– यस्य सर्वे पादाः परस्परं भिन्ना भवन्ति तद् विषमवृत्तं भवति।

## केचित् पारिभाषिकाः शब्दाः

1. **छन्दः** – छादनाच्छन्दांसि इत्युच्यन्ते। मनोविचाराणां भावानां वा मिश्रितवर्णेषु शब्देषु वा व्यवस्थापनं छन्दसा एव विधीयते। तेन व्यवस्थापनेन शब्दाः मन्त्ररूपं, श्लोकरूपं, पद्यरूपं वा एकम् आवरणं प्राप्नुवन्ति, अविचलित–स्वरूपाः च भवन्ति। तद् आवरणम् एव छादनरूपेण, आच्छादनरूपेण लक्ष्यते। तस्मात् छादनाद् एव च छन्दांसि इति नामकरणं प्रवृत्तं प्रसिद्धं च। वस्तुतः निश्चितवर्णान् मात्राः वा पादरूपेण मत्वा रचितो वाक्यसमूहः छन्दःसंज्ञको भवति। यद्यपि श्लोकशब्दः पूर्वं प्रशंसापद्यानां कृते प्रयुक्तो भवति स्म किन्तु अनन्तरं अनुष्टुब्वृत्तस्य कृते श्लोकशब्दस्य व्यवहारः प्रारब्धः। सम्प्रति संस्कृतभाषायाः छन्दः श्लोकनाम्नापि ज्ञायते। छन्दसः कृते पद्यशब्दस्य प्रयोगोऽपि भवति। पद्ये चत्वारः पादाः भवन्ति।
2. **पादः** – **'ज्ञेयः पादश्तुर्थोंऽशः'**। छन्दसोऽथवा पद्यस्य चतुर्थो भागः 'पाद'ः इत्युच्यते। छन्दःशास्त्रे पादस्य पर्यायत्वेन अङ्घ्रि–चरणशब्दावपि प्रयुक्तौ भवतः।
3. **वर्णः** – स्वरोऽथवा स्वरयुक्तव्यञ्जनः छन्दःशास्त्रे (वर्णः) इति कथ्यते।
4. **मात्रा** – स्वरवर्णस्य निश्चित उच्चारणकालो 'मात्रा' इत्युच्यते। लघु–गुरु–भेदेन 'मात्रा' द्विविधा भवति।

5 **लघुः** – ह्रस्वो 'लघुः' इत्युच्यते। ह्रस्ववर्णस्य एका मात्रा गण्यते। अ–इ–उ–ऋ–लृ– इत्येते पञ्च ह्रस्वस्वराः सन्ति। कस्मिंश्चिद् वर्णे एतेषां मात्रा विद्यमाना भवति तदापि स वर्णो लघुरेव गण्यते। छन्दःशास्त्रे लघोः संक्षिप्तं नाम 'ल' इति विद्यते। लघुकृतेऽत्र '।' चिह्नं प्रयुज्यते।

6 **गुरुः** – एकाधिकमात्राशीलो वर्णो 'गुरुः' इति कथ्यते। आ–ई–ऊ–ॠ–ए–ऐ–ओ–औ– इत्येते दीर्घस्वरा गुरुत्वेन गण्यन्ते। गुरुकृते 'ऽ' चिह्नं प्रयुज्यते। छन्दःशास्त्रे गुरोः संक्षिप्तं नाम 'गु' इत्यस्ति। गुरुवर्णज्ञानार्थं श्लोकोऽयं प्रसिद्धो वर्तते –

**संयुक्ताद्यं दीर्घं, सानुस्वारं विसर्गसंमिश्रम्।**
**विज्ञेयमक्षरं गुरु, पादान्तस्थं विकल्पेन।।**

अयमर्थः यत् –

1. **संयुक्ताद्यम्** – संयुक्तवर्णात् पूर्ववर्ति अक्षरं गुरु भवति। यथा– 'विद्या' इत्यत्र दकारयकारयोः संयोगो विद्यतेऽतः तत्पूर्ववर्ति 'वि' इत्यक्षरं गुरु भविष्यति।
2. **दीर्घम्** – आ–ई–ऊ– इत्यादि–दीर्घमात्रायुक्तानि अक्षराण्यपि गुरुत्वेन गण्यन्ते। यथा– सा,

सी, सू–इत्यादीनि।

3. **सानुस्वारम्** – अनुस्वारयुक्तमक्षरमपि गुरु भवति। यथा अंश–वंश–कंस– इत्यत्रानुस्वारयुक्तानि प्रथमाक्षराणि गुरूणि सन्ति।
4. **विसर्गयुक्तम्** – विसर्गयुक्तमक्षरमपि गुरु भवति। यथा–यशः, हरिः, गुरुः,–इत्यादीनि।
5. **पादान्तस्थं विकल्पेन** – पादान्ते आवश्यकतानुसारं छन्दोऽनुरोधेन लघुः अथवा गुरुः मन्यते।
6. **गणः** – छन्दःशास्त्रे त्रयाणामक्षराणां समूहो गणसंज्ञको भवति। गणोऽपि छन्दोऽनुसारं द्विविधो भवति –

(1) वर्णात्मको गणः

(2) मात्रात्मको गणश्च। तत्र –

**1. वर्णात्मकगणः –**

वर्णात्मकगणेषु यत्र त्रयोऽपि वर्णा गुरवः, असौ मगणः। आदिलघुर्यगणः, मध्यलघू रगणः, अन्तगुरुः सगणः, अन्तलघुस्तगणः, आदिगुरुर्भगणः, मध्यगुरुर्जगणः, सर्वलघुर्नगण इत्युच्यते। अनेन प्रकारेण अक्षरत्रयात्मकाः अष्टौ गणाः सम्भवन्ति। तत्र वर्णात्मक–गणस्वरूपबोधाय छन्दोमञ्जर्यां श्लोकः अस्ति –

**मस्त्रिगुरुस्त्रिलघुश्च नकारो, भादिगुरुः पुनरादिलघुर्यः।**
**जो गुरुमध्यगतो रलमध्यः, सोऽन्तगुरुः कथितोऽन्तलघुस्तः।।**

एतेषाम् अष्टानां गणानां स्वरूपं बोधयितुं तालिका–

| **स्वरूपम्–** | सर्वगुरुः | आदिलघुः | मध्यलघुः | अन्तगुरुः | अन्तलघुः | मध्यगुरुः | आदिगुरुः | सर्वलघुः |
|---|---|---|---|---|---|---|---|---|
| **गणः –** | मगणः | यगणः | रगणः | सगणः | तगणः | जगणः | भगणः | नगणः |
| **चिह्नानि –** | ऽ ऽ ऽ | ।ऽ ऽ | ऽ । ऽ | ।। ऽ | ऽ ऽ । | । ऽ। | ऽ।। | ।।। |
| **उदा.** – | मान्धाता | सुरेशः | भामिनी | सहसा | यानानि | नदीषु | आशिषि | सरसि |

एतेषां गणानां स्वरूपज्ञानार्थमेकं सूत्रमपि प्रसिद्धं वर्तते। तद्यथा – **'यमाताराजभानसलगम्।'**

एषु गणेषु यस्य स्वरूपं ज्ञातव्यं तस्य नामाक्षरतोऽग्रे द्वयोरक्षरयोः योजनेन तद्गणस्वरूपं निर्मितं भवति। यथा यगणं ज्ञातुं यकारादग्रस्थे द्वे अक्षरे यकारेण सह स्थापनीये तदा 'यमाता' इति यगणस्वरूपं प्राप्यते। एवमेव 'मातारा' इति मगणः, 'ताराज' इति तगणः, 'राजभा' इति रगणः, 'जभान' इति जगणः, 'भानस' इति भगणः, 'नसल' इति नगणः, 'सलगम्' इति सगणः इत्येवमष्टौ गणाः प्राप्यन्ते। सूत्रे 'ल' इत्यस्यार्थो 'लघुः' तथा 'गम्' इत्यस्यार्थो गुरुर्भवति।

**2. मात्रिकच्छन्दसां गणाः –**

आर्यादिमात्रिकच्छन्दसां गणाः पञ्च भवन्ति। एतेषु प्रतिगणं चतस्रो मात्राः भवन्ति। पञ्च मात्रिकगणाः सन्ति –

1. सर्वगुरुः – ऽ ऽ –2 + 2 = 4 मात्राः
2. अन्तगुरुः – ।। ऽ – 1 + 1 + 2 = 4 मात्राः

3. मध्यगुरुः – ।ऽ। – 1 + 2 + 1 = 4 मात्राः

4. आदिगुरुः – ऽ।। – 2 + 1 + 1 = 4 मात्राः

5. सर्वलघुः – ।।।। – 1 + 1 + 1. 1 = 4 मात्राः

**8. यतिः –**

छन्दस उच्चारणे व्यवस्थितस्वरूपं माधुर्यं च आनेतुं मध्ये यो विरामः स्वीक्रियते स यति–संज्ञको भवति। यथोक्तम् – **'यतिर्विच्छेदसंज्ञिका'**

सर्वेषां छन्दसां पादान्ते यतिर्भवति। श्लोकार्द्धानन्तरं तु यतिरनिवार्या भवति। केषुचित् छन्दःसु पादमध्येऽपि यतिर्भवति। छन्दोलक्षणेषु यतिः तृतीयाविभक्त्या सूच्यते।

**9. संख्यानां कृते प्रयुक्ताः शब्दाः –**

छन्दसां लक्षणेषु सङ्ख्यां ज्ञापयितुं साङ्केतिक–शब्दाः अपि प्रयुज्यन्ते। छन्दसां लक्षणबोधाय तेषां ज्ञानमप्यावश्यकं विद्यते। केचित् प्रमुखाः साङ्केतिक–शब्दाः एते सन्ति–

| साङ्केतिक – शब्दाः | संख्याः |
|---|---|
| चन्द्रमाः, पृथ्वी | (1) |
| पक्षौ, नेत्रे | (2) |
| गुणाः, रामाः, अग्नयः | (3) |
| वेदाः, वर्णाः, युगाः, आश्रमाः | (4) |
| शराः, इन्द्रियाणि, भूताः, तत्त्वानि | (5) |
| शास्त्राणि, रसाः, ऋतवः | (6) |
| अश्वाः, मुनयः, लोकाः, स्वराः | (7) |
| वसवः, यमाः, सिद्धयः | (8) |
| अङ्काः, ग्रहाः, द्रव्याणि, निधयः | (9) |
| दिशः, अवताराः | (10) |
| रुद्राः | (11) |

## 1. आर्या –

आर्या मात्रिकं छन्दो वर्तते। इदं छन्दः प्राकृतादिभाषासु 'गाथा' इति कथ्यते। आर्यायाः सामान्यलक्षणं भवति –

**यस्याः पादे प्रथमे,**
**द्वादशमात्रास्तथा तृतीयेऽपि।**
**अष्टादश द्वितीये,**
**चतुर्थके पञ्चदश साऽऽर्या।।**

अर्थात् यस्याः प्रथमे तृतीये च चरणे द्वादशमात्राः, द्वितीयचरणे अष्टादश, चतुर्थे चरणे च पञ्चदश मात्राः भवन्ति सा 'आर्या' इत्युच्यते। लघुवर्णस्य एका दीर्घवर्णस्य च द्वे मात्रे गण्येते। अत्रावधेयं यत् एतल्लक्षणमपि आर्यागुम्फितमेव विद्यते।

### उदाहरणम् –

2 + 2 + 2 + 2 + 2 + 2 = 12 मात्राः

**पथ्याशी व्यायामी,**

2 + 1 + 1 + 2 + 2 + 1 + 2 + 1 + 2 + 2 + 2 = 18 मात्राः

**स्त्रीषु जितात्मा नरो न रोगी स्यात्।**

1 + 1 + 1 + 1 + 2 + 1 + 1 + 2 + 2 = 12 मात्राः

**यदि मनसा वचसा वा,**

2 + 1 + 1 + 2 + 2 + 1 + 2 + 2 + 2 = 15 मात्राः

**द्रुह्यति नित्यं न भूतेभ्यः।।**

## 2. अनुष्टुप् (श्लोकः) –

वार्णिकवृत्तेषु अष्टाक्षरात्मकचरणवृत्तानाम् एका जातिः 'अनुष्टुप्' इत्युच्यते। संस्कृतसाहित्यस्य अधिकांशभागः अनुष्टुब्वृत्ते निबद्धो वर्तते। अनुष्टुप् श्लोकनाम्ना प्रसिद्धः अस्ति।

**लक्षणम् –**

**श्लोके षष्ठं गुरु ज्ञेयं, सर्वत्र लघु पञ्चमम्।**

**द्विचतुष्पादयोर्ह्रस्वं, सप्तमं दीर्घमन्ययोः।।**

अर्थात् श्लोकस्य प्रतिचरणं षष्ठम् अक्षरं गुरु, पञ्चमम् अक्षरं च लघु भवति। द्वितीये चतुर्थे च चरणे सप्तमम् अक्षरं लघु, प्रथमे तृतीये च चरणे सप्तमम् अक्षरं गुरु भवति।

। ऽ ऽ          । ऽ ।

**प्रथमे नार्जिता विद्या, द्वितीये नार्जितं धनम्**

। ऽ ऽ          । ऽ ।

**तृतीये न तपस्तप्तं, चतुर्थे किं करिष्यति।।**

## 3. इन्द्रवज्रा –

इन्द्रवज्रा त्रिष्टुब्–जातीयं छन्दो विद्यते। अस्मिन् प्रतिचरणम् एकादश वर्णाः भवन्ति।

**लक्षणम् – स्यादिन्द्रवज्रा यदि तौ जगौ गः।**

अर्थात् तौ – तगणद्वयं, जगौ – जगणः गुरुश्च, गः – गुरुः, यत्र भवन्ति तत्र इन्द्रवज्रा नाम वृत्तं भवति। अत्र पादान्ते यतिर्भवति।

**उदाहरणम्–    ऽ ऽ । ऽ ऽ । । ऽ । ऽऽ**

**गोष्ठे गिरिं सव्यकरेण धृत्वा**
**रुष्टेन्द्रवज्राहतिमुक्तवृष्टौ।**
**यो गोकुलं गोपकुलं च सुस्थं**
**चक्रे स नो रक्षतु चक्रपाणिः।।**

## 4. उपेन्द्रवज्रा –

उपेन्द्रवज्रा अपि त्रिष्टुब्–जातीयं छन्दो विद्यते। अस्मिन् प्रतिचरणम् एकादश वर्णा भवन्ति।

**लक्षणम् – उपेन्द्रवज्रा जतजास्ततो गौ।**

अर्थाद् यत्र जतजाः – जगण–तगण–जगणाः ततः – तदनन्तरं गौ – द्वौ गुरू भवतः तत्र उपेन्द्रवज्रानाम वृत्तं भवति।

**उदाहरणम् –**

**। ऽ । ऽ ऽ ।। ऽ । ऽ ऽ**
**सुखस्य दुःखस्य न कोऽपि दाता,**
**परो ददातीति कुबुद्धिरेषा।**
**अहं करोमीति मृषाभिमानः,**
**स्वकर्मसूत्रग्रथितो हि लोकः।।**

## 5. उपजातिः –

समानजातीययोः द्वयोर्वृत्तयोः चरणानां कस्मिंश्चिदपि छन्दसि संकरः (मिश्रणम्) उपजातिनाम्ना ज्ञायते, परन्तु छन्दःशास्त्रे द्वित्राणां मिश्रणमेव उपजातिरूपेण स्वीक्रियते। तत्रापि मुख्यरूपेण इन्द्रवज्रा–उपेन्द्रवज्रावृत्तयोः संकरेण (मिश्रणेन) सिद्धं वृत्तमेव उपजातिसंज्ञकं भवति।

**लक्षणम् –**

**अनन्तरोदीरितलक्ष्मभाजौ,**
**पादौ यदीयावुपजातयस्ताः।**
**इत्थं किलान्यास्वपि मिश्रितासु,**
**वदन्ति जातिष्विदमेव नाम।**

अर्थात् पूर्वोक्तयोः इन्द्रवज्रा–उपेन्द्रवज्रयोः मिश्रितलक्षणाः पादाः यासु भवन्ति ताः उपजातयो बोद्धव्याः। पादान्ते यतिः।

**उदाहरणम् –**

**। ऽ । ऽ ऽ । । ऽ । ऽऽ**
**अनन्तशास्त्रं बहुलाश्च विद्याः,**
**स्वल्पश्च कालो बहुविघ्नता च।**

**यत्सारभूतं तदुपासनीयं,**

**हंसैर्यथा क्षीरमिवाम्बुमध्यात्।।**

अत्र प्रथमः पादः उपेन्द्रवज्रायाः अवशिष्टपादाश्च इन्द्रवज्रायाः सन्ति। इन्द्रवज्रोपेन्द्रवज्रवृत्तयोः सम्मिश्रणादत्र उपजातिवृत्तं स्पष्टमेव।

### 6. भुजङ्गप्रयातम् –

भुजङ्गप्रयातस्य प्रतिचरणं द्वादशवर्णा भवन्ति।

**लक्षणम् – भुजङ्गप्रयातं चतुर्भिर्यकारैः।**

अर्थात् यत्र क्रमशः चत्वारो यगणा भवन्ति तत्र भुजङ्गप्रयातं नाम वृत्तं भवति। पादान्ते यतिः।

**उदाहरणम् –**

। ऽ ऽ। ऽ ऽ । ऽ ऽ । ऽ ऽ

**पुरः साधुवद्वाति मिथ्याविनीतः,**

**परोक्षे करोत्यर्थनाशं हताशः।**

**भुजङ्गप्रयातोपमं यस्य चित्तं,**

**त्यजेत्तादृशं दुश्चरित्रं कुमित्रम्।।**

### 7. वंशस्थम्

इदं जगतीजातीयं छन्दो वर्तते। अस्य प्रतिचरणं द्वादशवर्णा भवन्ति।

**लक्षणम् – जतौ तु वंशस्थमुदीरितं जरौ।**

अर्थात् यस्य प्रतिचरणं क्रमशः जगण–तगण–जगण–रगणाः भवन्ति तत् वंशस्थं नाम वृत्तं भवति। पादान्ते यतिः।

**उदाहरणम् –**

। ऽ । ऽ ऽ । । ऽ । ऽ । ऽ

**भवन्ति नम्रास्तरवः फलोद्गमैः ,**

**नवाम्बुभिर्दूरविलम्बिनो घनाः।**

**अनुद्धताः सत्पुरुषाः समृद्धिभिः,**

**स्वभाव एवैष परोपकारिणाम्।।**

### 8. द्रुतविलम्बितम् –

इदं द्वादशवर्णात्मकं (जगतीजातीयं) छन्दो वर्तते। यथा नाम्नैव स्पष्टं यदस्य पादस्य प्रारंभिकभागो द्रुतगत्या उत्तरार्द्धभागश्च विलम्बितगत्या पठ्यते, अत एवास्य नाम द्रुतविलम्बितमिति सञ्जातम्।

**लक्षणम् – द्रुतविलम्बितमाह नभौ भरौ।**

अर्थात् द्रुतविलम्बितस्य प्रतिचरणं क्रमशः नगण–भगण–भगण–रगणाः भवन्ति। पादान्ते यतिर्भवति।

**उदाहरणम् –**

**।।। ऽ।। ऽ। ।ऽ।ऽ**
**इतरपापफलानि यदृच्छया,**
**वितर तानि सहे चतुरानन!**
**अरसिकेषु कवित्वनिवेदनं**
**शिरसि मा लिख ! मा लिख ! मा लिख! ।।**

## अभ्यास–विस्तरः

1. छन्दो वर्तते –
   (क) वेदस्य मुखम् (ख) वेदस्य पादौ
   (ग) वेदस्य नेत्रे (घ) वेदस्य घ्राणम् ( )
2. वेदे प्रमुखानि छन्दांसि वर्तन्ते –
   (क) सप्त (ख) नव
   (ग) एकादश (घ) पञ्च ( )
3. छन्दःपरम्परा प्रारब्धा –
   (क) पाणिनेः (ख) शिवात्
   (ग) केदारभट्टात् (घ) पिङ्गलात् ( )
4. सर्वदा यतिर्भवति –
   (क) कुत्रापि (ख) पादारम्भे
   (ग) पादान्ते (घ) पादमध्ये ( )
5. छन्दःसूत्रस्य रचयिता वर्तते –
   (क) जयदेवः (ख) केदारभट्टः
   (ग) हेमचन्द्रः (घ) पिङ्गलः ( )
6. गणाः भवन्ति –
   (क) पञ्च (ख) त्रयः
   (ग) अष्ट (घ) सप्त ( )
7. भगणस्य स्वरूपं भवति –
   (क) ।ऽऽ (ख) ऽऽऽ
   (ग) ।।। (घ) ऽ।। ( )

8. सर्वलघुर्भवति –

(क) नगणः (ख) सगणः

(ग) रगणः (घ) जगणः ( )

9. मगणो भवति –

(क) आदिलघुः (ख) सर्वगुरुः

(ग) सर्वलघुः (घ) मध्यगुरुः ( )

10. ग्रहा भवन्ति –

(क) सप्त (ख) अष्ट

(ग) नव (घ) एकादश ( )

11. रुद्रैः बोधो भवति –

(क) दशसंख्यायाः (ख) सप्तसंख्यायाः

(ग) द्वादशसंख्यायाः (घ) एकादशसंख्यायाः ( )

12. निम्नलिखितेषु मात्रिकच्छन्दो वर्तते –

(क) आर्या (ख) अनुष्टुप्

(ग) द्रुतविलम्बितम् (घ) उपजातिः ( )

13. अनुष्टुप्–वृत्तस्य प्रतिचरणं वर्णा भवन्ति –

(क) दश (ख) अष्ट

(ग) नव (घ) एकादश ( )

14. श्लोके सदा गुरु भवति–

(क) सप्तममक्षरम् (ख) पञ्चममक्षरम्

(ग) षष्ठमक्षरम् (घ) प्रथममक्षरम् ( )

15. चत्वारो यगणा भवन्ति –

(क) द्रुतविलम्बिते (ख) उपजातौ

(ग) वंशस्थवृत्ते (घ) भुजङ्गप्रयाते ( )

16. मिश्रितं छन्दो वर्तते –

(क) उपजातिः (ख) जातिः

(ग) इन्द्रवज्रा (घ) उपेन्द्रवज्रा ( )

17. वंशस्थवृत्तस्य प्रतिचरणं गणानां क्रमो भवति–

(क) जगण–रगण–जगण–तगणाः

(ख) जगण–तगण–जगण–रगणाः

(ग) जगण–जगण–तगण–रगणाः

(घ) तगण–रगण–जगण–जगणाः ( )

18. प्रतिचरणं नगण–भगण–भगण–रगणाः भवन्ति –

(क) भुजङ्गप्रयाते (ख) उपजातिवृत्ते

(ग) वंशस्थवृत्ते (घ) द्रुतविलम्बितवृत्ते ( )

19. **'एकातपत्रं जगतः प्रभुत्वम्'** इति उदाहरणमस्ति –

(क) इन्द्रवज्रायाः (ख) भुजङ्गप्रयातस्य

(ग) द्रुतविलम्बितस्य (घ) उपेन्द्रवज्रायाः ( )

20. वर्णानां लघु–गुरु–व्यवस्थां निरूपयत।

21. लौकिकच्छन्दः कतिविधं भवति ? नामोल्लेखं कुरुत।

22. मात्रिकच्छन्दसः परिभाषां लिखत।

23. वार्णिकच्छन्दसः परिभाषां लिखित्वा तदुदाहरणमपि लिखत।

24. समवृत्तं किं भवति ?

25. छन्दःशास्त्रे 'पादः' इत्यनेन कोऽभिप्रायः ?

26. गणस्य परिभाषां लिखत।

27. गणस्वरूपबोधकं सूत्रं लिखत।

28. अष्टानां गणानां स्वरूपं प्रदर्शयत।

29. यतेः परिभाषां लिखत।

30. गच्छति देवदत्तः। इत्यत्र लघु–गुरु–चिह्नं प्रदर्शयत।

31. आर्याया लक्षणं लिखत।

32. श्लोकस्य लक्षणं लिखित्वा तदुदाहरणमपि प्रदर्शयत।

33. इन्द्रवज्रावृत्तस्य उदाहरणं लिखित्वा तत्र तल्लक्षणं संघटयत।

34. उपजाति–लक्षणं लिखत।

35. उपेन्द्रवज्राया लक्षणोदाहरणे प्रदर्शयत।

36. वंशस्थवृत्तस्य लक्षणोदाहरणे प्रदर्शयत।

37. निम्नलिखितपद्ययोः छन्दोनिर्णयं कृत्वा तयोर्लक्षणमपि लिखत–

(i) इतरपापफलानि यदृच्छया,
वितर तानि सहे चतुरानन।
अरिसिकेषु कवित्वनिवेदनं,

शिरसि मा लिख! मा लिख! मा लिख !।।

(ii) दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति।।

38. अधोलिखितपंक्तिषु छन्दोनिर्देशः कार्यः –

1. प्रियेषु सौभाग्यफला हि चारुता।
2. धर्मेण हीनाः पशुभिः समानाः।
3. त्वमेव माता च पिता त्वमेव।
4. कृष्णं वन्दे जगद्गुरुम्।
5. अर्थो हि कन्या परकीय एव।
6. द्रुतगतिः पुरुषो धनभाजनम्।
7. त्यजेत्तादृशं दुश्चरित्रं कुमित्रम्।